गुरुवरप्रार्थनापञ्चरत्नस्तोत्रम्

{॥ गुरुवरप्रार्थनापञ्चरत्नस्तोत्रम् ॥}

श्रीगणेशाय नमः ॥

यं विज्ञातुं भृगुः स्वं पितरमपगतः पंचवारं यथावज्ज्ञानादेवामृताप्तेः सततमनुपमं चिद्विवेकादि लब्ध्वा ।

तस्मै तुक्ष्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ १॥

यस्मान्नश्यस्य जन्मस्थितिविलयमिमे तैतिरीयाः पठन्ति स्वाविद्यामात्रयोगात्सुखशयनतले मुख्यतः स्वप्नवच्च ।

तस्मै तुक्ष्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ २॥

यो वेदान्तैकलक्ष्यः श्रुतिषु नियमितस्तैत्तिरीयैश्च काण्वैरन्यैरप्यानिषेकादुदयपरिमितं चारुसंस्कारभाजाम् ।

तस्मै तुक्ष्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ ३॥

यस्मिन्नेवावसन्नाः सकलनिगमवाङ्मौलयः सुप्तपुंसि प्रोक्तं तन्नाम यद्वन्निजमहिमगतध्वान्ततत्कार्यरूपे ।

तस्मै तुक्ष्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ ४॥

चित्त्वात्संकल्पपूर्वं सृजति जगदिदं योगिवमायया यः स्वात्मन्येवाद्वितीये परमसुखदृशि स्वप्नवद्भूम्नि नित्ये ।
तस्मै तुक्ष्यं नमः श्रीहरिहरगुरवे सच्चिदानन्दमुक्तानन्ताद्वैतप्रतीते न कुरु कितवतां पाहि मां दीनबन्धो ॥ ५॥

इत्यच्युतविरचितं गुरुवरप्रार्थनापंचरत्नस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Guruvara Prarthana Pancharatnam Lyrics in Devanagari PDF
% File name : guruvaraprArthanApaMcharatnastotram.itx
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, PSA Easwaran
% Latest update : April 29, 2013

% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website